# योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०७०



सप्ततितमः सर्गः ७०

श्रीवसिष्ठ उवाच ।

अथ भूधरशृङ्गाभा सा महाकृष्णराक्षसी ।

कज्जलाम्बुदलेखेव तानवं गन्तुमुद्यता ।। १

बभूवाभ्रोपमाकारा ततो विटपरूपिणी ।

पुंस्प्रमाणा ततोऽप्यासीदथाभूद्धस्तमात्रिका।। २

ततः प्रादेशमात्रा सा ततोऽप्यङ्गुलिरूपिणी ।

ततो माषशमीतुल्या ततः सूची बभूव ह ।। ३

ततः कौशेयसूचित्वं पद्मकेसरसुन्दरी ।

प्राप सा शिखराकारा संकल्पाद्रिरिवाणुताम् ।। ४

रराज सूचिका कृष्णा सूक्ष्मायसमनायसी ।

पुर्यष्टकेन चलिता व्योमगा व्योमवासिनी ।। ५

सूची दृश्यत एवासौ नत्वयो नाम विद्यते। ।

संविद्भ्रमकुले चैषा स्वल्पसूचीव लक्ष्यते ।। ६

रत्नसूचीव मसृणा मनोमननसंयुता ।

वैदूर्यरश्मिलेखेव भानुसंतानसुन्दरी। ।। ७

कज्जलाम्भोदसंकल्कलतेव पवनाहृता ।

सूक्ष्मरन्ध्रेक्षणस्वच्छदृष्टज्योतिःकनीनिका ।। ८

सुमुखग्राह्यरूपेण श्लक्ष्णपुच्छशिखाणुना ।

तदा वैपुल्यशान्त्यर्थं परं मौनव्रतं गता ।। ९

सुदूराद्दीपवदृष्टं खतन्मात्रत्वमागता ।

दूरादेव मनोज्ञेन प्रोद्गिरन्ती मुखेन खम् ।। 3.70.१०

कुञ्चितेक्षणसंदृश्या दीर्घदीपांशुकोमला ।

सद्यःस्नातसमुत्सन्नबालवालविलासिनी ।। ११

तन्तुर्बिसादिवोड्डीना बाह्यसंचारकौतुकात् ।

ब्रह्मनाडिरिवोद्युक्ता बहीरन्ध्रं सुसुन्दरी ।। १२

नियतेन्द्रियशक्तिः सा जीवेनैव बहिःस्थिता ।

बौद्धतार्किकविज्ञानसंतानवदलक्षिता ।। १३

शून्यसिद्धार्थसविका रन्ध्रानीलमयाऽरवा ।

अदृश्यया जीवसूच्या संततानुसृता स्थिता ।। १४

कलाकलनधर्मिण्या वासनामात्रसारया ।

क्षीणदीपांशुसूचीवत्तीक्ष्णयानुपलभ्यया ।। १५

ग्रासार्थं सूचितां याता सैवास्था नोपयुज्यते ।

विचारितं तया नैतदहो मौर्ख्यविजृम्भितम् ।। १६

साग्रा संचिन्तयामास न सूचीरूपतुच्छताम्।

चित्तमीहितमेवैकं पश्यन्त्यास्ते निरर्थकम् ।। १७

अविचार्यैव सूचित्वं तया मूढधियाऽऽस्थितम्।

नानर्थबुद्धेः स्फुरति पूर्वापरविचारणा ।। १८

स्वार्थक्रियोग्रसामर्थ्याद्याति भावनयान्यताम् ।

पदार्थोऽभिमतांशाढ्यो निःश्वासेनेव दर्पणः ।। १९

सूचीभावं प्रपन्नायास्त्यजन्त्याः पीवरं वपुः ।

महामरणमप्यस्या राक्षस्याः सुसुखं स्थितम् ।। 3.70.२०

एकवस्त्वतिरागाणामहो नु विषमा गतिः ।

देहोऽपि तृणवत्त्यक्तो राक्षस्या निजयेच्छया ।। २१

एकवस्त्वतिगन्धेन भ्रश्यन्त्यन्या हि संविदः ।

राक्षस्या ग्रासगन्धेन देहनाशोऽपि नेक्षितः ।। २२

नाशोऽपि सुखयत्यज्ञमेकवस्त्वतिरागिणम् ।

सूचीभूता विदेहापि परितुष्टैव राक्षसी ।। २३

अन्या वभूव लग्ना सा तथा जीवविषूचिका ।

व्योमात्मिका निराकारा व्योमवृत्तिशरीरका ।। २४

तेजस्तनुप्रवाहाभा प्राणतन्तुमयात्मिका ।

मूलसंवेदनाकारा चन्द्रार्कांशुकसुन्दरी ।। २५

पृथगेवासिधाराभा परमाण्ववलीय सा ।

कौसुमी गन्धलेखेव कला कलनरूपिणी ।। २६

पापात्मिका मनोवृत्तिः सो हि तस्यास्तथा स्थिता ।

परप्राणवशादेव परमार्थपरायणा ।। २७

एवमस्यास्तनुर्जाता सूचीद्वयमयी हि सा ।

नीहारांशुकवत्तन्वी कार्पासांशुसुपेलवा ।। २८

तनुद्वयेन तेनासौ प्रविश्य हृदयं नृणाम् ।

वेधयन्ती ततः क्रूरा प्रबभ्राम दिशो दश ।। २९

सर्वः स्वसंकल्पवशाल्लघुर्भवति वा गुरुः ।

कर्कट्योग्रं वपुस्त्यक्त्वा सूचीत्वमुररीकृतम् ।। 3.70.३०

तुच्छोऽप्यर्थोऽल्पसत्त्वानां गच्छति प्रार्थनीयताम् ।

सूचीवृत्तपिशाचीत्वं राक्षस्या तपसा स्थितम् ।। ३१

अपि पुण्यशरीराणां जातिबन्धो न शाम्यति ।।

तनुसूचीपिशाचीत्वं राक्षस्या तपसार्जितम् ।। ३२

तस्यां दिगन्तभ्रमणे प्रवृत्तायां महानिलैः ।

तत्रैव सा तनुः स्थूला गलिता शरदभ्रवत् ।। ३३

कस्यचिद्विवशाङ्गस्य क्षीणस्य विपुलस्य च ।

प्रविश्यान्तर्वातसूचिर्भवत्यतिविषूचिका ।। ३४

कस्यचित्तनुदेहस्य स्वस्थस्य सुधियोऽपि वा ।

प्रविश्य जीवसूचित्वे भवत्यन्तर्विषूचिका ।। ३५

एवं क्वचित्तृप्यति सा दुर्बुद्धिहृदयास्थिता ।

क्वचिदुच्छेद्यते पुण्यैर्मन्त्रौषधितपःक्रमैः ।। ३६

आसीद्बहूनि वर्षाणि भ्रमणैकपरायणा ।

देहद्वयेन गच्छन्ती व्योम्नि भूमितले तथा ।। ३७

रजस्तिरोहिता भूमौ हस्तेऽङ्गुलितिरोहिता ।

प्रभातिरोहिता व्योम्नि वस्त्रे सूत्रतिरोहिता ।। ३८

अन्तःस्थस्नायुसरिति दुर्भगे पांशुपाण्डुरे ।

शुष्करेखासरित्खाते सूक्ष्मरेखाजरत्तृणे ।। ३९

अर्थहीने गतच्छाये शून्या उच्छ्वासकारिणी ।

मक्षिकावातहरिते श्रीवृक्षपरिवर्जिते ।। 3.70.४०

स्थूलास्थिग्रन्थिवलिते नित्यकम्पस्फुरत्तमे ।

अनात्मीयाच्छनीहारेऽशुद्धांशुककृतभ्रमे ।। ४१

किणस्थाण्वङ्गविश्रान्तमक्षिकापिकवायसे ।

रौक्षरूढरसद्वाते विलोलाङ्गुलिशाखिनि ।। ४२

मालाभ्रलेखासंसारे स्वाङ्गुलिव्रणगर्तके ।

स्पन्दावश्यायपृषति पदवल्मीकपर्वते ।। ४३

कचत्याशु जलभ्रान्तौ नखाजगरकर्कशे ।

क्वाचित्कविसरद्भीतभीतयूककुपान्थके ।। ४४

विरूपाशुष्कसंदष्टवीटिकापूतिपल्वले ।

मध्यस्थलेखमार्गौघशीतश्वसनगोचरे ।। ४५

ग्रस्तयूकानरौघासृक्पूर्णसृक्किनखास्यताम् ।

दधताङ्गुष्ठपक्षेण क्रान्ते सर्वत्र यायिनी ।। ४६

नानाविरचनाचित्रपटपत्तनगामिनी ।

गमागमपरिश्रान्ता तत्रात्यन्तचिराध्वगा ।। ४७

नगरानगरे व्यस्तसूत्रभाण्डैकभारिणी ।

तप्ते कलेवरारण्ये बलीवर्दापवर्तिनी ।। ४८

गुप्ता विश्रमणायैव मनाक्करपरिच्युता ।

तन्तुप्रोता मुखाकृष्टिः खिन्ना क्वापि विलीयते। ।। ४९

वेधनं कर्मसंश्लिष्टा कठिनापि न साकरोत् ।

न हि तीक्ष्णो बहिः कार्यो निजत्वं विजहाति चेत्3.70.५०

सायःसूची मनःसूच्या वलिता विजहार ह ।

दिक्ष्वाशेव शिलागुर्वी नावाङ्गपलिता सती ।। ५१

विससार दिगन्तेषु सान्तःकरणसत्तया ।

तुषलेखेव पवनशक्त्या संसृतिरूपया ।। ५२

मुखेन सूक्ष्मसूत्रान्तं चरन्तीव परोम्भितम् ।

परपूरोद्यमेनाशु जातेव हृदयान्विता ।। ५३

परपूररसेनैव सूच्या हृत्सुविकासितम् ।

अनारतपतत्सूक्ष्मसूत्रान्त इव स्तम्भिता ।। ५४

तीक्ष्णैरपि चिरक्षीणं पूर्यते निर्विचारणा ।

दृष्टान्तोऽत्र क्षणात्सूच्या पूरितो जर्जरः पटः ।। ५५

सूत्रांशुनिर्गमे योग्यं सूच्या हृदयमर्जितम् ।

परपूरणयैवाशु तेजश्च कवितार्करुक् ।। ५६

अकस्मात्तेन रूढेन क्षीणपूरेण रूपिणी ।

हृदये राक्षसी सूचिः कर्मणा तप्यते च सा ।। ५७

वेधं पूररयेणेव करोति स्वं प्रचारिता ।

प्रकृतेन निजेनापि वेधाय व्यवहारिता ।। ५८

संचारयति वस्त्रेषु सूत्रं चतुरवेधनात् ।

आदीर्घवासनातन्तुः शरीरेष्विव चेतनाम् ।। ५९

संचार्यमाणवेधेन धावन्तीवाक्षिपातने ।

अदर्शितमुखा एव दुर्जना मर्मवेधिनः ।। 3.70.६०

कण्ठवस्त्रदलप्रोता वेधाक्ष्णा मुखमीक्षते ।

कथमेता भिनद्मीति तीक्ष्णानामेतदीप्सितम् ।। ६१

सममेव च कौशेये क्षौमे च वसने सृता ।

जडः क इव वा नाम गुणागुणमपेक्षते ।। ६२

सा दधाना ततं सूत्रमङ्गुष्ठाङ्गुलिपीडिता ।

आन्त्रतन्तुमिवामान्तमुद्गिरन्ती निरीक्षते ।। ६३

तीक्ष्णाप्यहृदयत्वेन सरसेष्वरसेष्ववित् ।

सूत्रितापि पदार्थेषु विशत्यरसगामिनी ।। ६४

अगर्दती मुखप्रोता सुतीक्ष्णापि च तापिधीः ।

सुवेधिताप्यहृदया राजपुत्र्यापि दुर्भगा ।। ६५

विना परापकारेण तीक्ष्णा मरणमीहते ।

वेदनाद्रोधिता सूची कर्मपाशे प्रलम्बते। ।। ६६

शेते किंश्याममैत्र्येव दूरे करपरिच्युता ।

स्वरूपसदृशं मित्रं कस्मै नाम न रोचते ।। ६७

मिश्रिता मूढचित्तानां वृत्तिभिः प्राकृते जने ।

तिष्ठत्यात्मसमां को हि संगतिं त्यक्तुमिच्छति ।। ६८,

भवत्ययस्कारवित्तौ संत्यज्यान्तर्धिगामिनी ।

भस्त्रावातैर्विचलिता गगनादुत्पतोन्मुखी ।। ६९

प्राणापानप्रवाहस्थहृत्पद्मान्तरचारिणी ।

दुःखशक्तिर्महाघोरा जीवशक्तिरिवोदिता ।। 3.70.७०

समानवैपरीत्येन समानसमगामिनी ।

उदानविपरीतत्वादुदानसमगामिनी ।। ७१

व्यानस्था व्याधिजननी सर्वाङ्गरसचारिणी ।

हृत्कण्ठे शूलपवने वैवर्ण्योन्मादकारिणी ।। ७२

प्रायशोऽविकहस्तस्था सुप्तोर्णा गन्धकोटरे।

बालहस्ताङ्गुलीतल्पवेधनैकविलासिनी ।। ७३

पादप्रविष्टा रुधिरपानोपार्जनविस्मिता ।

तुष्यत्यतितरां गुच्छभोजना तुच्छभोजनैः ।। ७४

शेते कर्दमकोशस्था चिरकालमधोमुखी ।

इच्छानुरूपमासाद्य क इवास्पदमुज्झति ।। ७५

क्रौर्येणापहतात्मानं दर्शयत्युपवेधनैः ।

उत्सवादपि नीचानां कलहोऽपि सुखायते ।। ७६

कपर्दकार्धलाभेन कृपणो बहु मन्यते ।

दुरुच्छेदा हि भूतानामहंकारचमत्कृतिः ।। ७७

सूचिकायुग्मलभ्येन मोहितेनात्मना नृणाम् ।

मृतिमाशङ्कते चित्रा स्वार्थे नोदेति मूढता ।। ७८

वस्त्रतन्तुविभेदेन परमारणमाशु मे ।

इदं संपद्यत इति भवत्यन्तर्हि निर्मला ।। ७९

स्थापिता मलमादत्ते यथा मृद्धर्षणं विना ।

परापराधविरहाद्व्याधिस्तस्याः प्रवर्तते ।। 3.70.८०

सूक्ष्माऽदृश्या चैव दात्री क्षणाद्विस्मृतिमेति सा ।

तीक्ष्णभेदकरी क्रूरा सूची चेष्टेव दैविकी ।। ८१

तन्तुवेधनमात्रेण हतोऽन्य इति तोषिता ।

दुर्जनो येन तेनैव नाशितेनैति हृष्टताम् ।। ८२

पङ्के मज्जति याति खं विहरति व्योमानिलैर्दिक्तटे

शेते पांसुषु भूतलेष्विव वने पट्टे गृहेऽन्तःपुरे ।

हस्ते श्रोत्रसरोरुहेऽथ मृदुनि स्वेच्छोर्णिकाखण्डके

रन्ध्रे काष्ठमृदां च माति हृदये द्रव्यात्मशक्त्यैव सा ।।

श्रीवाल्मीकिरुवाच ।

इत्युक्तवत्यथ मुनौ दिवसो जगाम

सायंतनाय विधयेऽस्तमिनो जगाम ।

स्नातुं सभा कृतनमस्करणा जगाम

श्यामक्षये रविकरैश्च सहाजगाम ।। ८४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे सूचिव्यवहारवर्णनं नाम सप्ततितमः सर्ग. ।। ७० ।।

षष्ठो दिवसः ।